रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 6

028

228 (HXG)

2016

# संस्कृतम्

(केवल प्रश्नपत्रम्)

अवधि : होरात्रयम् ]                                                                 [ पूर्णांक : 100

निर्देश : (i) अस्मिन प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।

(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।

(v) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) खण्डसंख्या अपि लेखनीया।

## खण्ड – 'क' (अपठितांश–अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

भारतस्य उत्तरे हिमालयः नाम गिरिः अस्ति। पुरा हिमगिरौ ऋषीणाम् आश्रमाः आसन्। एकस्मिन् आश्रमे एकः मुनिः अवसत्। सः आश्रमस्य कुलपतिः आसीत्। तत्र अनेके शिष्याः अपि अवसन्। ते मुनिम् अनमन्। ते मुनेः विद्याम् अपठन्। ते मुनिना सह भ्रमणाय अगच्छन्। ते मुनये पुष्पाणि फलानि च आनयन्। मुनिः स्नेहेन तेभ्यः शिक्षाम् अयच्छत्।

(क) एक पदेन उत्तरं लिखत–  1×2 = 2

(i) आश्रमस्य कुलपतिः कः आसीत् ?

(ii) मुनिः केभ्यः शिक्षाम् अयच्छत् ?

(ख) पूर्ण वाक्येन उत्तरत–  1

(i) शिष्याः केन सह भ्रमणाय अगच्छन् ?

(ग) निर्देशानुसारम् उत्तरत–  1×2 = 2

(i) 'अनेके शिष्याः' अनयोः पदयोः किं विशेष्यपदम् अस्ति ?

(ii) 'अयच्छत्' इति क्रिया पदस्य कर्तृपदं किं अस्ति ?

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

अस्माकं उपरि वर्तते विशालः आकाशः। आकाशस्य अन्तः न अस्ति। अतः आकाशम् अनन्तम् अपि वदन्ति। तत्र असंख्यानि नक्षत्राणि सन्ति। आकाशे सूर्यः, चन्द्रः, भौमः, बुधः, गुरुः, शुक्रः, शनिः च सप्त ग्रहाः सन्ति। निशायां चन्द्रस्य उदयः भवति। तस्य प्रकाशः शीतलः अस्ति। सः सूर्यात् प्रकाशं विन्दति। पूर्णिमायां चन्द्रस्य विम्बं वर्तुलं भवति। क्रमेण तत् क्षयति। अमावस्यायाम् आकाशे तस्य अंशः अपि न भवति। शुक्लपक्षे चन्द्रः क्रमेण वृद्धिं गच्छति कृष्णपक्षे क्रमेण क्षयति च। जनाः चन्द्रस्य प्रकाशं ज्योत्स्नां चन्द्रिकां इति च वदन्ति। चन्द्रस्य विधुः, सुधाकरः, ओषधीशः, निशापतिः च इति अनेकानि अभिधानानि सन्ति। रात्रौ आकाशे ताराः दीव्यन्ति। ते अस्मत् अति दूरं सन्ति।

(क) एक पदेन प्रश्नानां उत्तराणि लिखत– $1 \times 2 = 2$

(i) चन्द्रस्य विम्बं कदा वर्तुलं भवति ?

(ii) चन्द्रस्य प्रकाशः कीदृशः अस्ति ?

(ख) पूर्णवाक्येन उत्तरत– $2 \times 2 = 4$

(i) आकाशे कति ग्रहाः सन्ति ?

(ii) चन्द्रः कदा वृद्धिं गच्छति कदा च क्षयति ?

(ग) यथानिर्देशम् उत्तरत– $1 \times 2 = 2$

(i) 'तस्य प्रकाशः शीतलः' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(ii) 'अनेकानि अभिधानानि सन्ति' अत्र क्रियापदं किम् ?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 2

## खण्ड – 'ख' ( रचनात्मकं लेखनम् )

3. पठन–पाठनस्य प्रगतिसम्बन्धे पितरं प्रति लिखिते अस्मिन् पत्रे उचित पदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत सहायतार्थं मञ्जूषायां पदानि दत्तानि सन्ति– $1 \times 5 = 5$

नैनीतालतः

दिनाङ्क 18–2–2015

श्रद्धास्पदपितृचरणेषु !

सविनय प्रणामाञ्जलिः।

अहमत्र कुशली। .................... तत्रापि सर्वे कुशलिनः। मम अध्ययनं .................... प्रचलति। कक्षा–परीक्षासु समुत्तीर्णा जाताः। यद्यपि सर्वेषु विषयेषु .................... अङ्काः समधिगताः तथापि गणिते काऽपिन्यूनता वर्तते। .................... गणितस्य कृते विशेषरूपेण .................... दास्यामि। मातृचरणेभ्यो नमः। अनुजायै स्नेहः।

भवतां पुत्रः / पुत्री

क ख ग

| मञ्जूषा – सम्प्रति, समयं, सन्तोषप्रदाः, आशास्यते, सुचारुतया |
|---|

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत– $1 \times 5 = 5$

रोहितः – श्वेते ! .................... कस्यां कक्षायां पठसि ?

श्वेता – .................... तु नवम कक्षायां पठ्यते ?

रोहितः – किं त्वं संस्कृत–व्याकरणम् अपि .................... ?

श्वेता – आम् ! मया व्याकरणम् अपि .................... !

रोहितः – किम् अभ्यासपुस्तिकायाम् अपि उत्तराणि लिखसि ?

श्वेता – .................... मया अभ्यासपुस्तिकायाम् अपि उत्तराणि लिख्यन्ते।

| मञ्जूषा – आम्, पठसि, मया, पठ्यते, अधुना |
|---|

5. 'वसन्तऋतुः' इति विषयम् अधिकृत्य पञ्चवाक्यानि उत्तरपुस्तिकायां लिखत। सहायतार्थम् अधः मञ्जूषा दत्ता– $2 \times 5 = 10$

| मञ्जूषा – षड्ऋतवः, ऋतूनां राजा, प्रकृतिः, पिकाः, सुगन्धितः, नूतनानि पत्राणि, होलिका, कुसुमैः, वृक्षाः, मञ्जर्यः |
|---|

## खण्ड – 'ग' ( अनुप्रयुक्त व्याकरणम् )

6. अधोलिखितेषु रेखांकित पदेषु सन्धिं/सन्धि विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत– 1×3 = 3

(क) छात्र: तन्मय: भूत्वा पठति।

(ख) वने + अस्मिन् पशव: निर्भया: विचरन्ति।

(ग) पूर्वे भानूदय: भवति।

7. रेखांकित पदेषु समासं/समास विग्रहं कृत्वा लिखत– 1×4 = 4

(क) मुनि: गङ्गाया: समीपं तप: करोति।

(ख) सा प्राय: उत्थाय सूर्यदर्शनं करोति।

(ग) अस्माकं विद्यालये महोत्सव: अस्ति।

(घ) अर्जुनस्य सारथि: पीतानि अम्बराणि यस्य स: आसीत्।

8. कोष्ठकान्तर्गत पदेषु प्रकृति–प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत– 1×5 = 5

(क) .................. जलं (पा + क्त)।

(ख) मम देश: (शक्ति + मतुप्) .................. भवेत्।

(ग) दीनजनान् (सेव् + शानच्) .................. जना: पुण्यं लभन्ते।

(घ) अस्माभि: परस्परं स्नेहेन (वस् + तव्यम्) ..................।

(ङ) सा समाजस्य ............... (सेवक + टाप्) अपि अस्ति।

9. मञ्जूषाया: सहायतया निम्नलिखित वाक्यानि अव्ययशब्दै: पूरयित्वा लिखत– 1×5 = 5

(क) अयं वृद्ध: शिशु: .................. व्यवहरति।

(ख) सुखार्थिन: .................. विद्या।

(ग) अहम् अपि .................. जानामि।

(घ) स: .................. अपश्यत्।

(ङ) .................. अस्माकं परीक्षा भविष्यति।

| मञ्जूषा – | इतस्तत:, | श्व:, | कुत:, | इव, | किञ्चित् |
|---|---|---|---|---|---|

10. अधोलिखित वाक्यानां वाच्य परिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत– 1×3 = 3

(क) अहं ग्रामं गच्छामि।

(ख) रामेण पुस्तकं पठ्यते।

(ग) त्वं कार्यं करोषि।

11. घटिकां दृष्ट्वा शब्देषु लिखत, राधिका कदा किं करोति– 1×4 = 4



(क) प्रातः 9.30 बजे (ख) सायम् 3.45 बजे (ग) सायन् 5.15 बजे (घ) रात्रि 8.00 बजे

(क) राधिका प्रातः .............. वादने विद्यालयं गच्छति।

(ख) सा सायं .............. वादने विद्यालयात् आगच्छति।

(ग) सा .............. वादने जलपानं करोति।

(घ) रात्रौ .............. वादने राधिका पाठं पठति।

12. अधोलिखित वाक्ये अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानपूर्तिं संस्कृतेन कृत्वा पुनः उत्तर पुस्तिकायां लिखत– 1×2 = 2

अस्माकं ग्रामे (85) ................ कृषकाः सन्ति, तेषु (3) ................ कृषकाः अस्मिन् वर्षे पारितोषिकं लब्धवन्तः।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत– 1×4 = 4

(क) कृषकः क्षेत्रे <u>बीजाः</u> वपति।

(ख) सः <u>चौरेण</u> बिभेति।

(ग) मनोहरं <u>पुष्पः</u> विकसति।

(घ) आवाम् पुस्तकम् <u>पठिष्यामः</u>।

## खण्ड – 'घ' ( पठित अवबोधनम् )

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत–

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसतिस्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद्–'कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ? अयमेकस्तावद्विभज्य भुज्यताम्।

(क) एक पदेन उत्तरत– 1

(i) राजसिंहः कुत्र वसति स्म ?

(ख) पूर्णवाक्येन उत्तरत– 1×2 = 2

(i) पितुर्गृहं प्रति का चलिता ?

(ii) बुद्धिमती गहन कानने किं ददर्श ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) 'राजपुत्रः' इत्यस्मिन् शब्दे कः समासः ?

(ii) 'पुत्रद्वयोपेता' इत्यस्मिन् शब्दे सन्धिविच्छेदं कुरुत।

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–

मृगा मृगैः सङ्गमनुव्रजन्ति,
गावश्च गोभिः तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,
समान–शील–व्यसनेषु सख्यम् ।।

(क) एकपदेन उत्तरत– 1

(i) सुधियः काभिः सह अनुव्रजन्ति ?

(ख) पूर्णवाक्येन उत्तरत– 1×2 = 2

(i) के कैः सङ्गमनुव्रजन्ति ?

(ii) सख्यम् केषु भवति ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) 'अनुसरणं कुर्वन्ति' इत्यर्थे किं क्रियापदं श्लोके प्रयुक्तम् ?

(ii) 'अश्वैः' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत–

चाणक्यः – वत्स ! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

शिष्यः – तथेति (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इतः इतः श्रेष्ठिन् (उभौ परिक्रामतः)

शिष्यः – (उपसृत्य) उपाध्याय ! अयं श्रेष्ठी चन्दनदासः।

चन्दनदासः – जयत्वार्यः

चाणक्यः – श्रेष्ठिन् ! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः ?

चन्दनदासः – (आत्मगतम्) अत्यादरः शङ्कनीयः। (प्रकाशम्) अथ किम्। आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

चाणक्यः – भो श्रेष्ठिन् ! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

चन्दनदासः – आज्ञापयतु आर्यः, किं कियत् च अस्मज्जनादिष्यते इति।

चाणक्यः – भो श्रेष्ठिन् ! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

चन्दनदासः – (सहर्षम्) आर्य ! अनुगृहीतोऽस्मि।

(क) एक पदेन उत्तरत– 1

(i) चाणक्यः कं द्रष्टुम् इच्छति ?

(ख) पूर्णवाक्येन उत्तरत– 1×2 = 2

(i) कः अस्ति चन्दनदासः ?

(ii) किम् इच्छन्ति राजानः ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) अत्र 'व्यापाराणाम्' इत्यस्य कृते किं पदं प्रयुक्तम् ?

(ii) 'अस्मद्' इति कस्य विशेषणम् ?

17. अधोलिखित श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत–

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।। 1×3 = 3

भावार्थः –

मनुष्याणां .................... आलस्यं महान् शत्रुरिव मन्यते। उद्यमसमः कोऽपि बन्धुः नास्ति। ............... कृत्वा मानवः दुःखं न ................।

(ख) विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः ।। 1×3 = 3

भावार्थः–

अस्मिन् विचित्रे संसारे ................ व्यर्थं नास्ति। धावने यदि ............... वीरः मन्यते तथैव ........... खरः वीरः अस्ति।

18. अधोलिखित श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत–

(क) एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना ।। ½×3 = 1½

यथा–

एकेन राजहंसेन (i) ................ या शोभा भवेत्। परितः (ii) ................ बकसहस्रेण (iii) ................ न भवति।

(ख) सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ।। ½×3 = 1½

यथा–

फलच्छाया (i) ................ महावृक्षः सेवितव्यः। (ii) ................ यदि फलं नास्ति (वृक्षस्य) छाया (iii) ................ निवार्यते।

19. रेखाङ्कित पदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत– 1×4 = 4

(क) उद्याने <u>पक्षिणां</u> कलरवं चेतः प्रसादयति। (ख) <u>अरयः</u> व्यायामिनं न अर्दयन्ति।
(ग) इमान् तुषान् <u>स्वर्णकारेभ्यो</u> देहि। (घ) <u>व्याघ्रं</u> दृष्ट्वा धूर्तः श्रृगालः अवदत्।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत– ½×8 = 4

(i) अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्।
(ii) सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत्
(iii) न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्–पृथक् विवरणं श्रुतवान्।
(iv) आरक्षिणं च दोषभाजनम्।
(v) ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्।
(vi) किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्।
(vii) तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः।
(viii) अन्येद्युः तौ न्यायालये स्व–स्व–पक्षं पुनः स्थापितवन्तौ।

21. संस्कृतेन वाक्यप्रयोगं कुरुत– 1×3 = 3

(क) खगाः (ख) पठित्वा (ग) कृशकायः

*********